# ॥ वेङ्कटेश-अष्टकम् ॥

वेङ्कटेशो वासुदेवः प्रद्युम्नोऽमितविक्रमः।
सङ्कर्षणोऽनिरुद्धश्च शेषाद्रिपतिरेव च ॥ १ ॥

जनार्दनः पद्मनाभो वेङ्कटाचलवासनः।
सृष्टिकर्ता जगन्नाथो माधवो भक्तवत्सलः ॥ २ ॥

गोविन्दो गोपतिः कृष्णः केशवो गरुडध्वजः।
वराहो वामनश्चैव नारायण अधोक्षजः ॥ ३ ॥

श्रीधरः पुण्डरीकाक्षः सर्वदेवस्तुतो हरिः।
श्रीनृसिंहो महासिंहः सूत्राकारः पुरातनः ॥ ४ ॥

रमानाथो महीभर्ता भूधरः पुरुषोत्तमः।
चोळपुत्रप्रियः शान्तो ब्रह्मादीनां वरप्रदः ॥ ५ ॥

श्रीनिधिः सर्वभूतानां भयकृद् भयनाशनः।
श्रीरामो रामभद्रश्च भवबन्धैकमोचकः ॥ ६ ॥

भूतावासो गिरिवासः श्रीनिवासः श्रियः पतिः।
अच्युतानन्त गोविन्दो विष्णुर्वेङ्कटनायकः ॥ ७ ॥

सर्वदेवैकशरणं सर्वदेवैकदैवतम्।
समस्तदेवकवचं सर्वदेवशिखामणिः ॥ ८ ॥

इतीदं कीर्तितं यस्य विष्णोरमिततेजसः।
त्रिकाले यः पठेन्नित्यं पापं तस्य न विद्यते ॥ ९ ॥

राजद्वारे पठेद् घोरे सङ्ग्रामे रिपुसङ्कटे।
भूतसर्पपिशाचादिभयं नास्ति कदाचन ॥ १० ॥

अपुत्रो लभते पुत्रान् निर्धनो धनवान् भवेत्।
रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात्॥ ११ ॥

यद्यदिष्टतमं लोके तत् तत् प्राप्नोत्यसंशयः।
ऐश्वर्यं राजसम्मानं भुक्तिमुक्तिफलप्रदम्॥ १२॥

विष्णोर्लोकैकसोपानं सर्वदुःखैकनाशनम्।
सर्वैश्वर्यप्रदं नृणां सर्वमङ्गलकारकम्॥ १३॥

मायावी परमानन्दं त्यक्त्वा वैकुण्ठमुत्तमम्।
स्वामिपुष्करिणीतीरे रमया सह मोदते॥ १४॥

कल्याणाद्भुतगात्राय कामितार्थप्रदायिने।
श्रीमद्वेङ्कटनाथाय श्रीनिवासाय मङ्गलम्॥ १५॥

॥ इति श्री-ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे वेङ्कटगिरिमाहात्म्ये
श्री-वेङ्कटेश-अष्टकं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Venkatesha_Ashtakam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits